# बिल्वाष्टकम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधं ।
त्रिजन्म पाप संहारं एकबिल्वं शिवार्पणं ॥

त्रिशाखैः बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः ।
तवपूजां करिष्यामि एकबिल्वं शिवार्पणं ॥

कोटि कन्या महादानं तिलपर्वत कोटयः ।
काञ्चनं शैल दानेन एकबिल्वं शिवार्पणं ॥

काशीक्षेत्र निवासं च कालभैरव दर्शनं ।
प्रयागे माधवं दृष्ट्वा एकबिल्वं शिवार्पणं ॥

इन्दुवारे व्रतं स्थित्वा निराहारो महेश्वराः ।
नक्तं हौष्यामि देवेश एकबिल्वं शिवार्पणं ॥

रामलिङ्ग प्रतिष्ठा च वैवाहिक कृतं तथा ।
तटाकानिच सन्धानं एकबिल्वं शिवार्पणं ॥

अखण्ड बिल्वपत्रं च आयुतं शिवपूजनं ।
कृतं नाम सहस्रेण एकबिल्वं शिवार्पणं ॥

उमया सहदेवेश नन्दि वाहनमेव च ।
भस्मलेपन सर्वाङ्गं एकबिल्वं शिवार्पणं ॥

सालग्रामेषु विप्राणां तटाकं दशकूपयोः ।
यज्ञकोटि सहस्रस्य एकबिल्वं शिवार्पणं ॥

दन्ति कोटि सहस्रेषु अश्वमेध शतक्रतौ च ।
कोटिकन्या महादानं एकबिल्वं शिवार्पणं ॥

बिल्वाणां दर्शनं पुण्यं स्पर्शनं पापनाशनं ।
अघोर पाप संहारं एकबिल्वं शिवार्पणं ॥

सहस्रवेद पाटेषु ब्रह्म स्तापन मुच्यते ।
अनेकव्रत कोटीनां एकबिल्वं शिवार्पणं ॥

अन्नदान सहस्रेषु सहस्रोपनयनं तधा ।
अनेक जन्म पापानि एकबिल्वं शिवार्पणं ॥

बिल्वाष्टक मिदम् पुण्यं यः पठेश्शिव सन्निधौ ।
शिवलोक मवाप्नोति एकबिल्वं शिवार्पणं ॥